# Shri Parashurama Stotram

# શ્રીપરશુરામસ્તોત્રમ્

## Document Information

Text title : Parashurama Stotram 3

File name : parashurAmastotram3.itx

Category : vishhnu, dashAvatAra, vAsudevAnanda-sarasvatI, vishnu

Location : doc_vishhnu

Author : AchArya amRitavAgbhava

Transliterated by : Bageshri Sathe

Proofread by : Bageshri Sathe

Latest update : May 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 22, 2024

*sanskritdocuments.org*

Shri Parashurama Stotram

# શ્રીપરશુરામસ્તોત્રમ્

શ્રીપરશુરામમન્ત્રો યથા મન્ત્રમહાર્ણવે પ્રતિપાદિતઃ -
“ૐ રાઁ રાઁ ૐ રાઁ રાઁ ૐ પરશુહસ્તાય નમઃ” ઇતિ મૂલમન્ત્રઃ ।
અથ પરશુરામગાયત્રીમન્ત્રસ્તત્રૈવ યથા-
“ૐ જામદગ્ન્યાય વિદ્મહે મહાવીરાય ધીમહિ ।
તન્નઃ પરશુરામ પ્રચોદયાત્” ઇતિ ।

અથ અઙ્ગન્યાસઃ ।
ૐ જામદગ્ન્યાય હૃદયાય નમઃ ।
ૐ વિદ્મહે શિરસે સ્વાહા ।
ૐ મહાવીરાય શિખાયૈ વષટ્ ।
ૐ ધીમહિ કવચાય હું ।
ૐ તન્નઃ પરશુરામો નેત્રત્રયાય વૌષટ્ ।
ૐ પ્રચોદયાદસ્ત્રાય ફટ્ ।
ઇતિ ષડઙ્ગન્યાસઃ ॥

અથ કરન્યાસઃ ।
ૐ જામદગ્ન્યાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ વિદ્મહે તર્જનીભ્યાં નમઃ ।
ૐ મહાવીરાય મધ્યમાભ્યાં નમઃ ।
ૐ ધીમહિ અનામિકાભ્યાં નમઃ ।
ૐ તન્નઃ પરશુરામો કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ પ્રચોદયાત્ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ધ્યાનમ્ -
સમ્પૂર્ણા વિલસન્તિ સોપનિષદો વેદોપવેદો પુરઃ
પૃષ્ઠે માર્ગણપૂર્ણતૂણવિલસત્કોદણ્ડદણ્ડો મહાન્ ।
બર્હિષ્ટોમકમણ્ડલૂ ચ પરશુ પાણ્યોર્વહન્ શાસ્ત્રવિત્

શાપે શાસ્ત્રવરે ચ પેષલકરઃ શ્રીભાર્ગવો ભ્રાજતે ॥ ૧॥

મત્તક્ષત્રિયકૃત્તકણ્ઠવિગલદ્રક્તૌઘસમ્પ્લાવિતં
ભક્તાઽનુગ્રહણં કઠોરપરશું ધૃત્વાઽવતીર્યાઽધુના ।
દૃપ્તોદ્દણ્ડદુરીહદુષ્ટદમનો દીનાઽઽવલીપાલકો
ધર્મોદ્ધારધુરન્ધરો ભૃગુવરો રામઃ સમુજ્જૃમ્ભતામ્ ॥ ૨॥

શ્રીમદ્રેણુકયા ધૃતં સ્વજઠરે ભૂભારનાશાય યત્
શ્રીમદ્ભાર્ગવજામદગ્ન્યમતુલં રામાભિધાનં મહઃ ।
દૃપ્યત્પાર્થિવવૃન્દકાનનલલજ્જ્વાલાઢ્યવૈશ્વાનર-
શ્ચણ્ડીપ્રાણપતિપ્રિયસ્ય પરશોરાદાયિ તત્સંસ્તુમઃ ॥ ૩॥

લક્ષ્મીપતેરુરસિ રોષકષાયિતાક્ષઃ
પાદપ્રહારમકરોન્મુનિપુઙ્ગવો યઃ ।
બ્રહ્મર્ષિવૃન્દપરિચુમ્બિતપાદપદ્મઃ
સ શ્રીભૃગુર્જયતિ વિપ્રકુલપ્રકાશઃ ॥ ૪॥

શ્રીમાનુદારચરિતો જયતાદજસ્રં
બ્રહ્મર્ષિસોમજમદગ્નિરિતિ પ્રસિદ્ધઃ ।
દૃપ્યન્નૃપાન્તકરણં તનયં પ્રસૂય
યેનાઽખિલં જગદિદં પરિતો વ્યરક્ષિ ॥ ૫॥

સમ્પૂર્ણભૂમિગતવીરમહીગતાના
મન્યાયમાશ્રિતવતાં પ્રમદોદ્ધતાનામ્ ।
સા કાલરાત્રિરિવ નાશકરી સમન્તાત્
શ્રીરેણુકા ભગવતી વિજયાય ભૂયાત્ ॥ ૬॥

દેવેન યેન તતમસ્તિ સમસ્તમેત-
દ્વિશ્વં સ્વશક્તિખચિતં સ્વવિલાસરૂપમ્ ।
તં ત્વાં મહર્ષિગણપૂજિતપાદપદ્મં
સર્વાત્મના ભૃગુવરં શરણં ભજામઃ ॥ ૭॥

ધર્મદ્વિષાં નિયમનાય ગૃહીતદીક્ષમ્
શ્રીરેણુકાભગવતીજઠરાત્પ્રસૂતમ્ ।
શ્રીભાર્ગવસ્ય જમદગ્નિમુનેઃ સુપુત્રં
રામં લસત્પરશુપાણિતલં નમામઃ ॥ ૮॥

સ્ફૂર્જન્મદોદ્ધતનૃપાવલિકાનનાઽઽલી-
ર્દગ્ધ્વા મહીસુરગણાન્પરિરક્ષ્ય બન્ધૂન્ ।
ત્રાતં ભુવસ્તલમિદં ભવતા સમસ્તં
સમ્પ્રાપ્ય ખણ્ડપરશોઃ પરશું પ્રસન્નાત્ ॥ ૯॥

લોકત્રયાઽતુલપરાક્રમજન્મભૂમેઃ
શીર્ષં નિકૃત્ય કૃતવીર્યસુતાઽર્જુનસ્ય ।
ત્રિઃસપ્તવારમકરોર્વસુધાં સમસ્તાં
નિઃક્ષત્રિયાં સ્વપિતૃતર્પણકામનાયાઃ ॥ ૧૦॥

દુર્નીતપાર્થિવકદમ્બનિકૃત્તશીર્ષ-
ગ્રાવદ્રવદ્રુધિરસિદ્ધધુનીજલૌઘૈઃ ।
આકણ્ઠતો નિજપિતૄન્પરિતર્પ્ય પશ્ચાત્
પ્રાદાદ્ ધરાં વસુમતીં કિલ કશ્યપાય ॥ ૧૧॥

પાણૌ વિલોક્ય પરશું ભગવંસ્ત્વદીયે
સ્ત્રીવેષભાગ્દશરથોઽપિ પલાયિતોઽભૂત્ ।
યઃ સ્વાસનાર્ધમુપવેશ્ય પુરન્દરેણ
સમ્માનિતોઽભવદમોઘબલેન શશ્વત્ ॥ ૧૨॥

શ્રીરામ ! ભાર્ગવ ! ભવચ્ચરણારવિન્દ-
મૂલં શરણ્યમધુના વયમાગતાઃ સ્મઃ ।
કારુણ્યપૂર્ણસુદૃશા કિલ નોઽનુગૃહ્ય
શક્તિં નિજામનયનાશકરીં પ્રદેહિ ॥ ૧૩॥

વાક્ચાતુરી ચલતિ નો ચતુરાનનસ્ય
યચ્છિક્તવર્ણનવિધૌ ખલુ તત્ર કેયમ્ ।
અસ્માકમલ્પવિદુષાં નૃગિરા વરાકી
શક્તા ભવેત્તદપિ નાથ! વરં પ્રદેહિ ॥ ૧૪॥

વીરશ્રીજામદગ્ન્યસ્ય પુણ્યં સ્તોત્રમિદં નરાઃ ।
પઠન્ત્યનન્યમનસો યેઽર્થબોધપુરસ્સરમ્ ॥ ૧૫॥

દુઃશાસનાન્તકરણી ભીમા ધર્મપ્રબોધિની ।
તેષાં કરગતા શક્તિશ્ચકાસ્ત્યેવ ન સંશયઃ ॥ ૧૬॥

અઙ્કાષ્ટનન્દપૃથિવીમિતવૈક્રમાબ્દે

વૈશાખ શુક્લ ગિરિજાદિવસે ગ્રહેશે ।
માર્તણ્ડતીર્થભવને જમદગ્નિપુત્ર-
સ્તોત્રં વ્યધાયિ વિદુષાઽમૃત્વાગ્ભવેન ॥ ૧૭॥

ઇતિ શ્રીસર્વતન્ત્રસ્વતન્ત્ર મહામહિમ આચાર્ય
શ્રીમદમૃતવાગ્ભવપ્રણીતં શ્રી પરશુરામસ્તોત્રં સમ્પૂર્ણમ્ ।

વિધિન્યાસપૂર્વકજપાદ્ બ્રહ્મતેજપ્રાપ્તિર્ભવતીતિ મે મતિઃ ।
તન્ત્રોક્ત ચમત્કારિક મન્ત્ર ધ્યાનમ્ -
સાત્વિકં શ્વેતવર્ણં ચ ભસ્મોદ્ધૂલિતવિગ્રહં
અગ્નિહોત્રસ્થલાસીનં નાનામુનિગણાવૃતમ્ ।
કમ્બાસનમારૂઢં સ્વર્ણતારકુશાઙ્ગુલિં
શ્વેતવસ્ત્રદ્વયોપેતં જુહ્વન્તં રામમાશ્રયે ॥

ૐ અસ્ય મન્ત્રસ્ય ભારદ્વાજ ઋષિઃ, ગાયત્રી છન્દઃ,
શ્રીપરશુરામો દેવતા મનોકામના પ્રાપ્તયે જપે વિનિયોગઃ ।
મન્ત્રઃ -
ૐ બ્રહ્મક્ષેત્રાય વિદ્મહે ક્ષત્રિયાન્તાય ધિમહિ તન્નો રામઃ પ્રચોદયાત્ ।
(ઇતિ)

Encoded and proofread by Bageshri Sathe

*Shri Parashurama Stotram*

pdf was typeset on May 22, 2024

Please send corrections to *sanskrit@cheerful.com*